# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-आचार्य-२** | **प्रश्नपत्रम् – २** | **गुणाः – ७०** |
| **विषयः – पुराणेतिहासः** | **सत्रम्- ४ चतुर्थम्** | **समयः- ११:३० तः ०२:३०** |
| **दिनाङ्कः – २७/०८/२०२०** | **सन्दर्भग्रन्थः – महाभारतम् कर्णपर्वणः (कतिपयाध्यायाः)** | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ कस्याप्येकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यां कुरुत।** ०५

१ दैवमेव परं मन्ये धिक् पौरुषमनर्थकम्।
यत्र शालप्रतीकाशः कर्णोऽहन्यत संयुगे ।।

२ आशा बलवती राजन् पुत्रस्य तव चाभवत्।
हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान्।।

**प्रश्नः २ कस्याप्येकस्योत्तरं विस्तेरण लिखत।** १०

१ कर्णस्य सेनापतित्वेन नियुक्त्यर्थं अश्वत्थाम्नः प्रस्तावः।

२ नकुलकर्णयोः युद्धवर्णनं कुरुत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ कस्याप्येकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यां कुरुत।** ०५

१ आत्मनिन्दाऽऽत्मपूजा च परनिन्दा परस्तवः।
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ।।

२ शिक्षाप्रमादश्च बलं धृतिश्च द्रोणे महास्त्राणि च संनतिश्च।
स चेदगान्मृत्युवशं महात्मा सर्वानन्यानातुरानद्य मन्ये ।।

**प्रश्नः ४ कस्याप्येकस्योत्तरं विस्तरेण लिखत।** १०

१ शल्यदुर्योधनयोः वार्तालापं लिखित्वा कर्णस्य सारथित्वने शल्यस्य स्वीकृतिं लिखत।

२ कर्णस्य आत्मप्रशंसां शल्यद्वारा तस्य उपहासं च वर्णयत।

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत।** ०५

१ गुणान् गुणवतां शल्य गुणवान् वेत्ति नागुणः।
त्वं तु शल्य गुणैर्हीनः किं ज्ञास्यसि गुणागुणम् ।।

२ ततो भूतान्यन्तरिक्षस्थितानि तौ कर्णपार्थो प्रसशंसुर्नरेन्द्रः।
भोः कर्ण साध्यर्जुन साधु चेति वियत्सु वाणी श्रूयते सर्वतोऽपि ।।

**प्रश्नः ६ कस्याप्येकस्योत्तरं विस्तरेण लिखत।** १०

१ कौरवपाण्डवयोः युद्धं तथा च अर्जुनकर्णयोः पराक्रमं वर्णयत।

२ कर्णकृतमद्रदेशानां निन्दां वर्णयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ कस्याप्येकस्य ससन्दर्भव्याख्यां कुरुत।** ०५

१ पश्य पार्थ धनुः श्रेष्ठं विकर्षन् साधु शोभते ।
शत्रुं जित्वा यथा शक्रो देवसंघैः समावृतः।।

२ त्रयोदशाहं वर्षाणि यस्माद् भीतो धनंजय।
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित् ।।

**प्रश्नः ८ कस्याप्येकस्योत्तरं विस्तरेण लिखत।** १०

१ अर्जुनकृतकर्णवधप्रतिज्ञां वर्णयत।

२ कर्णकृतपाण्डवसेनासंहारः।

## संयुक्तान्वितिः (Unit 5)

**प्रश्नः ९ केषाञ्चित् दशप्रश्नानां लघूत्तराणि लिखत।** १०

१ वैशम्पायनमुनिः कस्मै कथां श्रावयति?

२ अश्वत्थामा कस्य पुत्रः आसीत्?

३ शैल्यः कस्य सारथिः आसीत्?

४ धृतराष्ट्रः कं युद्धवृत्तान्तं पृच्छति?

५ अजातशत्रुः कः?

६ कर्णपर्वणि कति अध्यायाः सन्ति?

७ सुयोधनः अर्थात् कः?

८ कर्णवधः केन कृतः?

९ महाभारतस्य मुख्यरसः कः?

१० महाभारतस्य मुख्यनायकः कः?

११ वायुपुत्रः कः?

१२ महाभारते कति श्लोकाः सन्ति?

१३ कर्णस्य गुरोर्नाम किम्?

१४ गवल्गणपुत्रः कः?

१५ महाभारतसंग्रामः कुत्र आसीत्?

*************************